श्री त्रिपुरभैरवी हृदयं

श्री त्रिपुरभैरवी हृदयं

मेरौ गिरिवरेगौरी शिवध्यानपरायणा |
पार्वती परिपप्रच्छ परानुग्रहवांछया || 1 ||

श्रीपार्वत्युवाच-
भगवंस्त्वन्मुखांभोजाच्छ्रुता धर्मा अनेकशः |
पुनश्श्रोतुं समिच्छामि भैरवीस्तोत्रमुत्तमं || 2 ||

श्रीशंकर उवाच-
शृणु देवि प्रवक्ष्यामि भैरवी हृदयाह्वयं |
स्तोत्रं तु परमं पुण्यं सर्वकळ्याणकारकं || 3 ||

यस्य श्रवणमात्रेण सर्वाभीष्टं भवेद्ध्रुवं |
विना ध्यानादिना वाऽपि भैरवी परितुष्यति || 4 ||

ॐ अस्य श्रीभैरवीहृदयमंत्रस्य दक्षिणामूर्तिः ऋषिः पंक्तिश्छंदः – भयविध्वंसिनी भैरवीदेवता – हकारो बीजं – रीं शक्तिः – रैः कीलकं सर्वभयविध्वंसनार्थे जपे विनियोगः ||

अथ करन्यासः |
ॐ ह्रीं अंगुष्ठाभ्यां नमः |
ॐ श्रीं तर्जनीभ्यां नमः |
ॐ ऐं मध्यमाभ्यां नमः |
ॐ ह्रीं अनामिकाभ्यां नमः |
ॐ श्रीं कनिष्ठिकाभ्यां नमः |
ॐ ऐं करतलकरपृष्ठाभ्यां नमः ||

अथांगन्यासः |
ॐ ह्रीं हृदयाय नमः |
ॐ श्रीं शिरसे स्वाहा |
ॐ ऐं शिखायै वषट् |
ॐ ह्रीं कवचाय हुं |

ॐ श्रीं नेत्रत्रयाय वौषट् |
ॐ ऐं अस्त्राय फट् |

ध्यानं |
देवैर्ध्येयां त्रिनेत्रामसुरभटघनारण्यघोराग्नि रूपां
रौद्रीं रक्तांबराढ्यां रति घटघटितो रोजयुग्मोग्ररूपां |
चंद्रार्धभ्राजि भव्याभरण करलसद्बालबिंबां भवानीं
सिंदूरापूरितांगीं त्रिभुवनजननीं भैरवीं भावयामि || 1 ||

पंचचामरवृत्तं –
भवभ्रमत्समस्तभूत वेदमार्गदायिनीं
दुरंतदुःखदारिणीं सुरद्रुहां
भवप्रदां भवांधकारभेदन प्रभाकरां
मितप्रभां भवच्छिदां भजामि भैरवीं सदा || 2 ||

उरः प्रलंबिताहिमाल्यचंद्रबालभूषणां
नवांबुदप्रभां सरोजचारुलोचनत्रयां
सुपर्वबृंदवंदितां सुरापदंतकारकां
भवानुभावभाविनीं भजामि भैरवीं सदा || 3 ||

अखंडभूमि मंडलैक भारधीरधारिणीं
सुभक्तिभावितात्मनां विभूतिभव्यदायिनीं
भवप्रपंचकारिणीं विहारिणीं भवांबुधौ
भवस्यहृदयभाविनीं भजामि बैरवीं सदा || 4 ||

शरच्चमत्कृतार्ध चंद्रचंद्रिकाविरोधिक
प्रभावती मुखाब्ज मंजुमाधुरी मिलद्भिरां
भुजंगमालया नृमुंडमालया च मंडितां
सुभक्तिमुक्तिभूतिदां भजामि भैरवीं सदा || 5 ||

सुधांशुसूर्यवह्नि लोचनत्रयान्विताननां
नरांतकांतक प्रभूति सर्वदत्तदक्षिणां
समुंडचंडखंडन प्रचंडचंद्रहासिनीं
तमोमतिप्रकाशिनीं भजामि भैरवीं सदा || 6 ||

त्रिशूलिनीं त्रिपुंड्रिनीं त्रिखंडिनीं त्रिदंडिनीं
गुणत्रयातिरिक्तमप्यचिंत्यचित्स्वरूपिणीं
सवासवाऽदितेयवैरि बृंदवंशभेदिनीं
भवप्रभावभाविनीं भजामि भैरवीं सदा || 7 ||

सुदीप्तकोटिबालभानुमंडलप्रभांगभां
दिगंतदारितांधकार भूरिपुंजपद्धतिं
द्विजन्मनित्यधर्मनीतिवृद्धिलग्नमानसां
सरोजरोचिराननां भजामि भैरवीं सदा || 8 ||

चलत्सुवर्णकुंडल प्रभोल्लसत्कपोलरुक्
समाकुलाननांबुजस्थशुभ्रकीर नासिकां
सचंद्रभालभैरवास्य दर्शन स्पृहच्चकोर-
नीलकंजदर्शनां भजामि भैरवीं सदा || 9 ||

इदंहृदाख्यसंगतस्तवं पठंतियेऽनिशं
पठंति ते कदापिनांधकूपरूपवद्भवे
भवंति च प्रभूतभक्ति मुक्तिरूप उज्ज्वलाः
स्तुता प्रसीदति प्रमोदमानसा च भैरवी || 10 ||

यशोजगत्यजस्रमुज्ज्वलंजयत्यलंसमो
न तस्य जायते पराजयोऽंजसा जगत्त्रये
सदा स्तुतिं शुभामिमां पठत्यनन्यमानसो
भवंति तस्य संपदोऽपि संततं सुखप्रदाः || 11 ||

जपपूजादिकास्सर्वाः स्तोत्रपाठादिकाश्च याः
भैरवीहृदयस्यास्य कलान्नार्हंति षोडशीं || 12 ||

किमत्र बहिनोक्तेन शृणु देवि महेश्वरि
नातः परतरं किंचित् पुण्यमस्ति जगत्त्रये || 13 ||

इति श्रीभैरवकुलसर्वस्वे श्रीभैरवीहृदयस्तोत्रं ||